श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - ३

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः

प्रो. अर्कनाथः चौधरी

सम्पादकौ

डॉ. ललितकुमारः पटेलः

डॉ. जानकीशरणः आचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

Scanned with CamScanner

**प्रकाशकः -**

**डॉ. दशरथः जादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

**समन्वयकः -**

**डॉ. कार्तिकपण्ड्या**
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© ***Shree Somnath Sanskrit University***, *2017*

**प्रथमं संस्करणम्** - जनवरी - २०१७

**प्रतयः** - ३५०

**ISBN** - 978-93-83097-19-7

**मूल्यम्** - रु. २५०/-

**मुद्रकः** - **जलाराम ग्राफिक्स एन्ड ओफसेट**
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

# विषयानुक्रमणिका


| | | |
|---|---|---|
| १. | वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम् | ०१-१० |
| | प्रो. देवेन्द्रनाथः पाण्डेयः | |
| २. | काव्यशास्त्रीयः गुणविमर्शः | ११-२० |
| | डो. नरेन्द्रकुमार एल. पण्ड्या | |
| ३. | 'रँ' प्रत्याहार-विमर्शः | २१-३० |
| | प्रो. विनोद कुमार झा | |
| ४. | अमोघत्वं भवभूतेः | ३१-३९ |
| | प्रो. अर्चना दुबे | |
| ५. | मृच्छकटिके वर्णिता राज्ञः राज्यस्य च विभावना | ४०-४५ |
| | डॉ. महेन्द्रकुमार अं. दवे | |
| ६. | वैदिकवाङ्मये दीक्षाविचारः | ४६-५० |
| | डॉ. अमृतलालः भोगायता | |
| ७. | भारतीयप्रतिभातत्त्वचिन्तपरिप्रेक्ष्ये राजशेखरदिशा प्रतिभा | ५१-५९ |
| | डॉ. ललित पटेलः | |
| ८. | वर्तमानसमये पर्यावरणसंरक्षणस्यावश्यकता तदर्थं वैदिकोपायाः | ६०-६७ |
| | डॉ. शत्रुघ्नपाणिग्राही | |
| ९. | वसंस्कृतसाहित्यदृष्ट्या धर्मः | ६८-७२ |
| | डॉ. डायालाल एम. मोकरिया | |
| १०. | आयुर्वेददृष्ट्या आरोग्यप्राप्तौ आहार-विहारयोः योगदानम् | ७३-८१ |
| | डॉ. पङ्कजकुमार एस्. रावलः | |


Scanned with CamScanner

# वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम्

✍ प्रो. देवेन्द्रनाथ पाण्डेयः

सम्पूर्णेऽस्मिन् विश्वसाहित्ये, पौरुषेयमपौरुषेयञ्चेति द्विविधं साहित्यमुपलभ्यते। तत्र पौरुषेयसाहित्येषु रामायणमहाभारताधारितानि कालिदासादिभिः रचितानि काव्यानि, पाश्चात्यदेशीयानि च पुनः ग्रीक-लेटिनप्राचीनभाषागर्भाद् विकसिताङ्ग्लादिभाषासु, चौसर-सेक्सपीयरप्रभृतिभिः रचितानि साहित्यानि सन्ति।

तद्विपरीतं त्वपौरुषेयमार्षसाहित्यं वैदिकवाङ्मयमस्ति[1] तत्समकक्षं च तिष्ठति जेन्द-अवेस्ता[2] ईरानस्य। एतेषां समेषां साहित्यानां सम्यगर्थावबोधाय विशेष-विशेषपद्धतयः साहित्यविशेषप्रकृत्यनुसारं कालानुरोधेन विकसिताः विकासिताश्च जाताः सन्ति। विशेषरूपेणात्र वैदिकलौकिकसंस्कृतसाहित्यसन्दर्भे व्याख्यानं प्रवर्तितमस्ति। तत्रापि कश्चिद्विशेषविचारो विधास्यते वैदिकसाहित्यप्रसङ्गे।

यथा वयं जानीमो यल्लौकिकदृश्यश्रव्यकाव्यादीनामर्थावबोधाय वेदाङ्गत्वेन कल्पितं[3] व्याकरणं तथैवान्ये कोशादिग्रन्थाः पौरुषेयाः सहायकीभूताः ग्रन्थाः आश्रीयन्ते। परन्तु श्रौतसाहित्यसङ्कुलस्यालौकिकत्वात्, अपौरुषेयत्वाच्च तैः लौकिकव्युत्पत्तिशास्त्रीयग्रन्थैः साधनैश्च सहान्येऽप्युपायाः अपेक्षिताः भवन्त्यर्थावबोधाय।

अत एवास्मिन् विषये विचारोपक्रमः अधस्ताल्लिखितानुसारमस्तिः।

**वेदशब्दः-**

बहुविधाभिर्व्युत्पत्तिभिर्निष्पादितोऽयं वेद-शब्दः नानाविधामभिख्यामभिधत्ते। नानाप्रकारकवेदशब्दव्युत्पत्तिजनितार्थचिन्तनं वैदिकसाहित्यैतिहासिकग्रन्थेषु गुम्फितं दृश्यते। अतस्तत्र दिङ्मात्रमेवप्रकाशः क्रीयते।

वेदस्य सर्वासु व्युत्पत्तिषु विद्-ज्ञाने इति धातोःसिद्धावस्थायां विहितेन करणार्थे घञ्- प्रत्यययोगेन प्रतिपद्यते प्रतिपाद्यते प्रातिपदिको हि वेद इति। एतस्माद्यौगिक-

Scanned with CamScanner

वेदशब्दात् सु-प्रत्यये कृते लोकव्यवहार्यो हि वेदः इति शब्दः विचक्षणैः साध्यते। तादृग्लौकिकार्थव्युत्पत्तिसन्दर्भेऽपि विद्-धातोः करणे घञि कृते, ऋगादिचतुर्विधवेदानां नित्यत्वमपौरुषेयत्त्वञ्च सिध्यति समानभावेन। यद्यपि अपौरुषेयशब्दराशेर्वेदस्य पौरुषेयसाहित्यसाधनैः साङ्गोपाङ्गं व्यवस्थितञ्च व्याख्यानं न भवितुमर्हति, परन्तु तत्र काचित् पारम्परिक्यवधारणा वैदिकमन्त्राणां भाष्यकरणावसरे प्राचीनाचार्यैरङ्गीकृता वर्तते स्थलविशेषेषु। तदस्ति प्रेक्षणीयमधस्तात्-

**वैदिकव्याख्यायाः परम्पराः-**

**वैदिकसाहित्यस्य मूलं स्वरूपम्**[४] - मन्त्रब्राह्मणात्मकमेव वेदस्य स्वरूपं मत्वाऽत्र व्यख्याने मे प्रवृत्तिस्तस्मान्मम मतानुसारमविशेषरूपेण मन्त्राः ब्राह्मणानि च पूर्णं वेदस्वरूपमुपस्थापयन्ति, ब्राह्मणग्रन्थेषु मन्त्राणां निर्वचनविनियोगादिसन्दर्भे व्याख्यानात्। एतदत्रोल्लेखनीयमस्ति यत् केचन भिन्नसम्प्रदायपरवशीकृताः विद्वांसः संहितासु सङ्कलितान् मन्त्रान् एव मूलवेदत्वेनाङ्गीकुर्वन्ति। तस्मात्त एव मन्त्राः अपौरुषेयाः सन्तीति ते ख्यापयन्ति लोके। तद्बुद्ध्या वेदव्याख्याकरणे क्वाचित्की यादृच्छिकी प्रवृत्यपि जनानामवलोक्यते। अत एतदस्माभिरवगन्तव्यमस्ति यत् अपौरुषेयशब्दराशेरपि भाष्यं सर्वप्रथमंपौरुषेयमेवासीद् ब्राह्मणसाहित्यसङ्कुलरूपे।[५] अतो वैदिक-भाष्यकरणपरम्परा, अतीवप्राचीना ऋषिसम्प्रदायसम्बद्धा च वर्तते। शतपथादिब्राह्मणग्रन्थेषु वैदिकमन्त्राः क्रमिकरूपेण श्रौतयज्ञानुगुणं व्याख्याताः[६] सन्ति तथैव तेषां मन्त्राणां व्यापकस्वरूपमुपस्थापयितुमावश्यकतानुसारं दार्शनिकसन्दर्भेऽपि ज्ञानकाण्डं वेदस्य पोषयितुं व्याख्या प्रदत्ता वर्तते। अत एवाह- **ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यान ग्रन्थ** इति। मन्त्राः कथं व्याख्यातव्याः, कस्मिन् प्रसङ्गे सन्दर्भे च कीदृग्भवति वैदिकशब्दार्थः इति सर्वं विवेचयति स्पष्टतया ब्राह्मणसाहित्यम्।

तथा चैकस्यैव मन्त्रस्य यज्ञानुष्ठानदृष्ट्या व्यहारदृष्ट्या, आधिभौतिकाधिदैविकाध्यात्मिकदृष्ट्या मीमांसामपि प्रस्तौति ब्राह्मणसाहित्यम्। भावोऽयमस्ति यत् मन्त्रेषु सङ्केतरूपेण त्रिविधाः अर्थाः गुम्फिताः ये भवन्ति, तेषां सम्यक्प्रकाशनमर्थापनकरणमाध्यमेन प्रस्तौति विपुलं ब्राह्मण साहित्यम्। अस्मादेवकारणाच्छास्त्रेषु **इति श्रुतेः, इति श्रुतेः** इति वाक्यस्याभ्यासो दृश्यते। यज्ञप्रसङ्गेऽपि विनियोगविध्यनुसारं[७] याज्ञिकसन्भाराणाम्, प्रयाजानुयाजानुष्ठानविधीनां

Scanned with CamScanner

तेषाञ्च क्रमनिर्धारणादिकञ्च विधत्ते ब्राह्मणसाहित्यम्। तथैव याज्ञिकदेवतासन्दर्भे दक्षिणायाः प्रमाणनिर्धारणविषये तस्यौचित्यविषये च समुचितं निर्णयं करोति ब्राह्मणसाहित्यम्। अत एवाह ब्राह्मणग्रन्थप्रतिपाद्यविषयसन्दर्भे-

**हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।**
**परक्रिया पुराकल्पो व्यवधारणकल्पना ।**
**उपमानं दशैवेति विधयो ब्राह्मणस्य वै ।।**

अनेन प्रकारेणैतदवगम्यते यदिमे ब्राह्मणग्रन्थाः एव सन्ति ये विधिवाक्यान्युपदिशन्ति[८] बाहुल्येन। तदभावात्क्रत्वनुष्ठानप्रक्रियाविसम्वादः स्यात्। एतेषामेव विधिवाक्यानामन्तःस्थितपदार्थविश्लेषणे मीमांसाप्रवृत्तिः तत्प्रवृत्तेरभावाद्वैदिकधर्मस्य दृढा भूमिर्न तिष्ठेत्, तस्मादेतेषां ब्राह्मणग्रन्थानामाद्यवेदभाष्यरूपत्वमपौरुषेयत्वं नित्यत्वञ्च[९] मान्यमेवास्ति। तथैवान्येऽपि विविधास्तर्काः तेषां ब्राह्मणानामपौरुषेयत्वसाधने शास्त्रेषु सङ्कलिताः सन्ति येषामत्रविस्तरभयान्न विधीयते विवेचनं विशषम्।

अत एतत्सिध्यति यत् वैदिकसंहितागतानां मन्त्राणां दर्शनसमकाल एव तेषामर्थविशेषविज्ञानमपि ब्राह्मणग्रन्थरूपेणास्मिन् लोके प्रादुर्भूतं जातम्। अतः सिध्यति ब्राह्मणग्रन्थानामाद्य भाष्यरूपत्वम्। तत्र च पुनः तकनीकीदृष्ट्या विचार्यमाणे पक्षे खल्वप्येतत्सिध्यति यत् ब्राह्मणग्रन्थेषु याः पद्धतयः वेदव्याख्यानस्याविष्कृताः सन्ति ऋषिभिस्ताः सन्ति वैज्ञानिक्यः सर्वथा पूर्णाश्चेति। यतो हि तत्र वैदिकमन्त्राणां व्याख्यानार्थं[१०] निर्वचन-पौराणिकाख्यान-तार्किकदृष्टेश्चावलम्बनमवाप्यते। मन्ये एतत्सर्वमेवाग्रे वेदाङ्गसाहित्यसमवायरूपेणाविष्कृतं जातंकालानुरोधेन। अर्थदिकैकां व्युत्पत्त्यादिकां धारामवलम्ब्य षड्वेदाङ्गानि लोकेविभिन्नैराचार्यैः रचितानि। आचार-व्यवहारप्रमुखार्थाश्च भगवतो वेदस्य पुनः कल्पसाहित्येषु पुराणकल्परूपेष्वपि प्रस्फुटिताः जाताः। अत एवाह-[११] **इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्** इति। उपबृंहणमत्र लोकेबह्वीषु शास्त्रधारासु शास्त्रार्थरूपेण विद्यमानस्य वस्तुनः वेदार्थत्वेनावकलनम्। अत एवाह जैमिनिः- **असति ह्यनुमानम्**-(१,३०)। आपाततो विरोधप्रतीतौ[१२] सत्यां शास्त्रेषु तत्परिहाराय संवादस्थापनाय चापि प्रक्रिया सङ्केतिता वर्तते वेदव्याख्यारूपेषु ब्राह्मणग्रन्थेषु। अतः सिध्यति ब्राह्मणग्रन्थानामार्षव्याख्याग्रन्थरूपत्वम्।

Scanned with CamScanner

## (वै)दिकव्याख्यायाः अन्यानि मौलिकघटकतत्त्वानिः-

**(अ) व्याकरणसाध्या व्युत्पत्तिप्रक्रिया-** वैदिकसंहितागतानां मन्त्राणां सहजभावार्थावबोधाय सर्वप्रथमं व्याकरणशास्त्रावबोधो भवत्यावश्यकः। व्याकरणप्रमाणेनाङ्गिनो वेदस्य सत्यं स्वरूपं तत्साध्यव्युत्पत्तिमाध्यमेन जगति सिद्धं प्रायशो मन्यते। व्याकरणव्युत्पत्तेः व्याकरणनियमसाध्याभावे जाते च सति महर्षिपाणिनेः **बहुलं छन्दसि** इत्युपदेशात्तत्तच्छब्दस्वरूपं दुरूहं वेदस्य साधुत्वमेवाव कल्प्यते विद्वद्भिरद्यापि लोके। एतदस्माभिरवगन्तव्यमस्ति यत् व्याकरणस्य प्राचीनपरम्परायामाचार्यपाणिनेः व्याकरणस्य परमं यशः लोकेभूयः प्रसृतमस्ति। आचार्यपाणिनेर्वेदं प्रति भावमवकलय्यैवाचार्यपतञ्जलिः स्वकीयमहाभाष्ये(पश्पशाह्निके) व्याकरणस्य वेदार्थप्रतिपत्तये साधुत्वं साधयन् कथयति-**रक्षोहागमलघ्वसंदेहार्थाः प्रयोजनम्**[१३] इति। तस्माद्व्याकरणावबोधः वैदिकपदार्थावभासने भूयः साहाय्यमाचरति। तस्य कारणमस्ति यत् मीमांसा-व्याकरण-प्रातिशाख्यग्रन्थानाम् प्रमाणेनैवावधार्यते यद्वेदोक्ताः वर्णाः शब्दाश्च, वैदिकलौकिकसंस्कृतशब्दसमूहरूपेणावगम्यन्ते। तेनैवाधारेण शब्दानां नित्यतायाः सिद्धान्तोऽप्यवधार्यते भारतीयसंस्कृतौ। तत्र च पुनः वेदानामपौरुषेयत्वमस्ति कारणमिति मे मतिर्भवति। तन्माध्यमेनैतदप्यवधार्यते यत् अतिप्राचीने काले सम्पूर्णो हि शब्दभाण्डागारः समानभावेन[१४] वेदेष्वेवासीद्व्यवस्थितः। वैदिकलौकिकसंकृतयोजना त्वर्वाचीना प्रतिभाति। उक्तं यथा- **लौकिकानामर्थपूर्वकत्वात्, न समत्वात्-** (शुक्लयजुः प्रातिशाख्यम्-१. २-३) तस्मादेतदवधार्यते यद्व्याकरणशास्त्रसिद्धसंस्कृतशब्दसमवायो वैदिकपदसमूहान्नातिभिन्नः प्रत्युतत्त्रैव वैदिकवाङ्मयसङ्कुले गर्भीकृतोऽस्ति। तत्साधुत्वसाधन-वेदाङ्गरूपत्वस्य व्याकरणस्य वेदार्थकरणं प्रति योगदानं सिद्धं भवति।अर्थात् अवयवरूपव्याकरणेनावयविनोर्वेदस्य मौलिकार्थावगमने सारल्यमुपजायते। अतः वैदिकव्याख्याघटकतत्त्वेष्वन्यतमं तत्त्वं व्याकरणस्य सम्यग्ज्ञानमस्तीति सिद्धं भवति।

**(ब) निरुक्तिविज्ञानम्-** यद्यपि व्याकरणव्युत्पत्तिः, कस्मिंश्चिदंशे निरुक्तिं, वैदिकपदार्थानामर्थावबोधविषये सम्यगुपकरोति तथा च कतिपये

दुरूहपदप्रत्यायने वैदिकसाहित्यस्य व्याकरणप्रमाणच्छायाप्रधाना निरुक्तिरप्युपकरोति व्याकरणं वेदार्थरक्षणोद्देश्येन, तथापि क्वचित्स्वतन्त्ररूपेणापि निर्वचननाम्नी निरुक्तिप्रधाना व्युत्पत्तिरपि वैदिकव्याख्याविषये महत्त्वमावहति। अत एवाह यास्कः- **व्याकरणस्य कात्स्न्र्यं स्वार्थसाधकञ्चेति**।[१५] अत्रैतदवगन्तव्यमस्ति यत् यथा वैदिकपदानां सिद्धये, आचार्यपाणिनिः **बहुलं छन्दसि**[१६] इति नाम्नः वैदिकप्रक्रियागतस्य सूत्रस्य विविधवैदिकपदव्युत्पत्तये पुनरावृत्तिं विधत्ते तथैव व्याकरणव्युत्पत्तिगौरवं स्थापयितुमाचार्ययास्कः अपि प्रयतते स्वीये निरुक्ते। विशेषरूपेण निरुक्तस्य द्वितीयाध्याये यास्कः कथयतिः- **तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयात्** इति। अर्थात् येषु वैदिकपदेषु, उदात्तादिस्वराः, धातुप्रत्ययलोपागमवर्णविकारादिविषयाः व्याकरणशास्त्रसम्मताः स्पष्टाश्च प्रतिभान्ति तेषां वैदिकपदानां प्रासङ्गिकमर्यादायां (in the light of contextual limitation and requirement) निर्वचनं विधेयमिति। अनेन नैरुक्तसमयेन, व्याकरणशास्त्रवेदाङ्गमर्यादाभ्यर्हिता प्रतिष्ठिता च। तथापि कतिचिद् दुरूहश्रुतिशब्देषु संस्कृतव्याकरणस्य नियतनियममाध्यमेन व्युत्पत्त्यर्थकरणासम्भवे

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्**[१७]।।

**इत्युक्तैः** पञ्चविधवेदपदप्रत्यायनकेन्द्रीभूतैः निरुक्ततत्त्वैः लोकव्यहार-व्याकरण-दर्शन-श्रौतकर्मधर्मशास्त्रभावाञ्चितप्रज्ञाबलेन तेषां वैदिकपदानां निर्वचनं निरुक्तेनैव निष्पाद्यमित्यस्ति निरुक्त्युपायोपदेशप्रधानकलेवरकलितस्य निरुक्तस्य सन्देशः वेदाङ्गत्वेनोपयोगिता च तस्य वेदार्थप्रतिपादने। तस्मादेतत्सिध्यति यद् यथा व्याकरणं वैदिकपदानि व्युत्पाद्यार्थावगमनं प्रति वेदस्यात्मनो धर्मं निर्वहति तथैव निरुक्तमपि स्वसङ्कल्पनारूढं सदर्थावबोधने वैदिकपदानां, स्वीयां भूमिकां प्रमाणयति। यथाः- **मृगो न भीमो कुचरो गिरिष्ठा**[१८] - इत्यस्यार्थं स्पष्टयन् स्वकीयया विशिष्टनिर्वचनतकनीक्या कथयति यास्कः- **मृग इव भीमः कुचरो गिरिष्ठाः - मृगो मार्ष्टेर्गतिकर्मणः। भीमो बिभ्यत्यस्मात्। भीष्मोप्येतस्मादेव। कुचर इति चरति कर्म कुत्सितम्**। अथ



Scanned with CamScanner

चेद्देवताभिधानम् क्वायं न चरतीति। अनेन प्रकारेणैतत्सिध्यति यत् निरुक्तिर्निरुक्तस्य विशिष्टा रीतिर्वेदव्याख्यानस्यास्ति यस्यां वैदिकपदनिर्वचने भौगोलिकसामाजिकैतिहासिकवैज्ञानिकमनोवैज्ञानिक-सांस्कृतिकपदार्थानां[१९] सन्दर्भाः यथावसरमाश्रीयन्ते, वैदिकपदानां मूलभावनामाविष्करणाय। निरुक्तवेदाङ्गेन सहान्येषामपि वेदाङ्गानां वेदव्याख्यानायापेक्षितमस्ति[२०] सम्यग्ज्ञानम्। यद्यपि ज्योतिषशास्त्रवेदाङ्गस्य तिथ्यादिनिर्धारणे, शुभमुहूर्तावकलने, यज्ञमण्डपादीनाञ्च शोधने विशेषविनियोगस्तथापि तत्सम्बन्धितत्त्वान्यपि सङ्केतरूपेण वेदे प्राप्तत्वात् तेषाञ्च ज्योतिषशास्त्रालोकेऽर्थापनं भवत्यावश्यकं तस्मात्तच्छास्त्रविज्ञैरेव वेदाङ्गज्योतिषशास्त्राध्ययनेनैव च साध्यमस्ति ज्योतिषसम्बद्धपदानामर्थापनम्। अतः प्रत्यक्षशास्त्रमिदं वेदाङ्गमपि वेदार्थकरणे महदुपकारकं भवति।

ज्योतिषशास्त्रमिवास्ति कल्पवेदाङ्गस्यापि[२१] महत्त्वं याज्ञिकसन्दर्भानुकूलं वैदिकमन्त्राणां व्याख्यानाय। यथा वयं जानीमो यत्कल्पवेदाङ्गसाहित्ये श्रौत-गृह्य-धर्म-शुल्बसूत्रग्रन्थानां समावेशो भवति। एषु चतुर्धा प्रवृत्तेषु कल्पग्रन्थेषु श्रौत-गृह्यसूत्राणि तु मुख्यरूपेण श्रौतगृह्यकर्मकाण्डं प्रति प्रवृत्तानि, संस्काराणाञ्चानुष्ठानसहायकानि सन्ति, येषामाधारेण मीमांसादर्शनं प्रवृत्तं दृश्यते। शुल्बसूत्रमपि वेद्याः वैदिकयज्ञशालायाश्च निष्पादनसन्दर्भे प्रवृत्तं मन्यते। अद्य तु तदाधारेणाधुनिकगणितविज्ञानक्षेत्रे शोधकार्यमपि क्वाचित्कं प्रवृत्तं दृश्यते। परन्तु धर्मसूत्राणि स्मृतयश्च पुनः[२२] आचारव्यवहारसंस्कारानुष्ठानं प्रति स्वकीयामनिर्वचनीयां भूमिकां निर्वहन्ति। तत्साहित्यसङ्कुलसाहाय्येनैव भारतीयसंस्कृतेः स्वरूपं निर्मितं भवति। एतत्सर्वं वेदार्थप्रपञ्चसिद्धमेवास्तीति ज्ञेयम्। येषां सन्दर्भाः ऋग्वेदादीनां वागादिसूक्तेषूपलब्धाः[२३] सन्ति।

**(स) ऋषि, देवता, छन्दश्चः[२४]-**

वैदिकमन्त्राणां समुचितव्याख्याकरणे ऋषेः, देवतायाः, छन्दसामपि भवति महती भूमिका।[२५] आधुनिकसाहित्यसमालोचनसिद्धान्तानुसारं यथैतदुच्यते यत् कस्यचिदपि साहित्यस्य समालोचनसन्दर्भे सर्वदैव तस्य साहित्यस्य मूले स्थिताः व्यक्तिविशेषादयः बहवो विषयाः ध्यातव्याः भवन्ति। तथैव वैदिकमन्त्राणामपि व्याख्यानसन्दर्भे मन्त्रेषु सूक्तेषु च सङ्केतिताः ऋषयः, देवताश्च विचारणीयाः

सम्यग्मन्त्रव्याख्यानाय । तथैव मन्त्रेषु छन्दसामपि विचारो विधेयः वैदिकमन्त्रव्याख्यानावसरे । यतो हि सूक्तेषु मन्त्रेषु च ऋषिचरित्रम् ऋषिभावनादयश्च विषयाः भवन्ति । तथा चाध्यात्मिकदृष्ट्या वैदिकमन्त्राणां व्याख्यनायापि छन्दसामस्ति ज्ञानमावश्यकम् । रहस्यमिदं स एव जनो वेत्ति यः पारम्परिकरूपेण गुरोः सकाशाद् वेदमधीतवान् भवति । तथैव छन्दसां विज्ञाने भाषाविज्ञानतत्त्वज्ञानं गणितीयविज्ञानञ्च मुख्यरूपेण निहितं मन्यते । छन्दसामाधारेणैव वैदिकमन्त्राणां पदपदाक्षरसङ्ख्यानिर्धारिता सम्प्रत्यपि प्राप्यते । तत्कारणादेव भगवतो नारायणरूपेषु वैदिकमन्त्रेषु प्रक्षेपणसमस्या न दृश्यते । यथा लौकिकसंस्कृतसाहित्ये कदाचित् स्मृतावपि कल्प्यते प्रक्षेपः । तच्छन्दसामाधारेण च पदपाठकरणे स्वरनिर्धारणे च वेदव्याख्यासन्दर्भे सौविध्यमुपजायते । अतः एतेषां सर्वेषामुपर्युक्तानां तत्त्वानामाधारेण व्याख्या वैदिकमन्त्राणां[२६] विधेया । अस्याभिप्रायोऽयमस्ति यत् अपौरुषेयमन्त्रराशेरपि पृष्ठभागे ऋषयः, देवाः तेषाञ्च विपुलः समाजः दिव्यसामाजिकवातावरणञ्च बहूनि वस्तूनि मन्यन्ते । अतस्तेषां सर्वेषामालोके वैदिकमन्त्राणां व्याख्या विधेया इति । एतत्सर्वं विचिन्त्यैवाचार्यः शौनकः बृहद्देवतायाम् आचार्यो यास्कश्च स्वनिरुक्तस्य दैवते काण्डे देवतोपपरीक्षासन्दर्भे बहून् वेदभाष्यसिद्धान्तान् उदीरयामासतुः । एतेषामेव व्याख्यातत्त्वानामाश्रये, स्कन्द-उवट-सायण-महीधरादयो वेदभाष्यकाराः आचार्याः स्वस्वभाष्यं[२७] लिखितवन्तः । एतेषां भाष्याणामाधारेण च पुनः अन्येऽपि कालान्तरीयाः वेदविचारकाः देशकालपरिस्थितिमूल्यमाधारीकृत्य खण्डनमण्डनकर्तारश्च विद्वांसः पाश्चात्यवेदानुवादकाः समीक्षणप्रियाश्च मैक्समूलरप्रभृतयो विद्वांसः स्व-स्वलेखनकर्म वेदसम्बन्धि कृतवन्तः । अस्मादेवकारणात् प्राचीनभाष्याणां महत्त्वं जगति जेगीयते जनैः ।

## (द) वैदिकस्वरः[२८]-

एतत्स्वरविज्ञानमेव वेदस्य विशिनष्टि वेदमन्यसाहित्यसमवायात् । अस्मादेवकारणात् आचार्यपाणिनिः अन्ये च पूर्वतनीयाः वैयाकरणाः स्वरविधानविषये व्याकरणनियमान् निर्मितवन्तः। लौकिकसंस्कृतसाहित्यसमवाये काव्यसौन्दर्यविषये तथा भूमिका तेषां स्वराणां नास्ति यथा वेदविषये । इमे

Scanned with CamScanner

वैदिकस्वराः वैदिकमन्त्राणां धर्मरूपाः तदाधारेण लौकिकसंस्कृतशब्दानामपि धर्मरूपास्तु सन्ति परन्तु श्रौतयागादिषु प्रयोक्तव्यानां मन्त्राणामुच्चारणे प्रासङ्गिकवेदमन्त्रव्याख्यानावसरे च स्वराणां भवति परीक्षा यज्ञफललाभाय। अतः स्थलविशेषे पदविशेषस्यार्थविशेषावगमनाय स्वराणामुदात्तादीनां परिज्ञानमस्ति ह्यावश्यकम्। स्वरविशेषप्रभावकारणादेव वृत्रासुरं पराजितवान् इन्द्रः।

यद्यपि वैदिकव्याख्याघटकतत्त्वानि बहूनि सन्ति परन्तु सामान्यरूपेणैवात्राहं तेषां विवेचनां कृतवान् अस्मि। अतः एतेषामुक्तानां वेदव्याख्याघटकतत्त्वानामालोके यदि वेदार्थकरणे जनानां प्रवृत्तिर्भविष्यति तदैव स्वारस्यमुपलब्धं वेदस्य भविष्यति न तु भौतिकलोकरञ्जनहेतवे ह्यनियन्त्रितवेदव्याख्यानेन। तथाकरणात् अर्थात् नियमविरुद्धवेदव्याख्याकरणाद्धानिः शास्त्राणां तस्माच्च वेदरक्षाधर्महानिश्च स्यात्।

***

## पादटिप्पणयः

१. अपौरुषेयं वाक्यं वेदः- स च विधि-मन्त्र-नामधेय-निषेधार्थवादभेदात् पञ्चविधः- (अर्थसंग्रहः- लौगाक्षिभास्करस्य) तथा च- पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता।
काठकादिसमाख्यानाद्वाक्यत्वाचान्यवाक्यवत्।।
समाख्यानं प्रवचनात् वाक्यत्वं तु पराहतम्।
तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता।। -जैमिनिन्यायमालाविस्तरः (मायणः) १.१.८

२. द्र. संस्कृतभाषा का इतिहास, पृ. ३३ (श्रीमती मंजुशर्मा) रचना प्रकाशन, जयपुर

३. एकश्चवेदशब्दः आद्युदात्तः शब्दराशेर्बोधकः, अपरश्चान्तोदात्तः कुशमुष्ट्यादेर्बोधकः- वेदं कृत्वा वेदिं करोति- इत्यत्र- द्र. वेदस्वरूपविमर्शः- स्वामिकरपात्री जी।

४. मन्त्रब्राह्मणयोर्वेदनामधेयम्-आपस्तम्बश्रौतसूत्रम् (परिभाषाप्रकरणम्) २४.१.३१

५. ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः- तैत्तिरीयसं. भाष्यम् (१.५.१) The distinction of form between the Mantra and the Brahmana is obvious. The former has the facility for Samhita(words being combined grammatically) Character, and therefore requires Padpath- (recital of separated words). --- It (Brahmana) lacks the Samhita character--- see Tattiriya Samhita-page-23, -by R.L.Kshyap.

६. See footnote - 5.

७. द्र.पृ.११५,वैदिकसाहित्य एवं संस्कृति - डा.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन-वाराणसी।

Scanned with CamScanner

तथा च - नैरुक्त्यं यत्र मन्त्रस्य विनियोगः प्रयोजनम् ।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते ।। द्र. तत्रैव

८. यथा- स्वाध्यायोऽध्येतव्यः, अग्निहोत्रं जुहोति, इत्यादि। यावन्तं हवा इमां पृथिवीं वित्तेन पूर्णां ददत् लोकं जयति त्रिभिस्तावन्तं जयति, भूयांसं चाक्षय्यं य एवं विद्वान् अहरहःस्वाध्यायमधीते। तस्मात् स्वाध्यायोऽध्येतव्यः- शतपथब्राह्मणम्- ११.५.६.३-७

९. द्र. जैमिनिन्यायमालाविस्तरः-पृ.२७ तथा च वेदस्वरूपविमर्शः-पृ.४२२-२३, यथा महर्षीणां वचनैः मन्त्राणां ब्राह्मणानाञ्च वेदत्वं प्रमीयते।

१०. द्र.टि.७ नैरुक्त्यं यत्र मन्त्रस्य....।

११. "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। तथा च पुराणप्रोक्तेषु ब्राह्मणकल्पेषुः - द्र. वैदिक साहित्य एवं संस्कृति, बलदेव उपाध्यायः, पृ.८६, तथा च वेदस्वरूपविमर्शः पृ.४२८

१२. द्र.जैमिनिन्यायमालाविस्तर, पृ.२८(स्मृतेर्मूलवेदेऽनुमितेर्मात्वसम्भवात्।

१३. द्र.पश्पशाह्निक-भागम्

१४. द्र.व्याकरण शास्त्र का इतिहास, भूमिकाभाग- ब्रह्मदत्त जिज्ञासु।

१५. द्र. निरुक्तम्-प्रथमोऽध्यायः

१६. यथा बहुलं छन्दसि ७.३.९७ इट् विषये ७.१.१०२. उकारादेशविषये, उदा.ततुरिः,जगुरिः,आसीत्(बहुलतया)।

१७. द्र.वैदिकसाहित्य एवं संस्कृति, पृ.२०६-डा.कपिलदेव द्विवेदी।

१८. द्र.निरुक्तम्-प्रथमः अध्यायः पादः ६,खण्डः२०(मुकुन्द झा व.सी)

१९. यथा निरुक्तस्य तृतीये अध्याये स्त्रियः दायादभागपरके निर्वचने यास्को वक्ति, तथा च - स्मशानसञ्चयोऽपि गर्त उच्यते-इति-निरुक्तम्,३.१.६

२०. अङ्ग्यन्ते ज्ञायन्ते अमीभिरित्यङ्गानि-द्र. वेदाङ्गेतिहासः-डा. नरेश झा

२१. कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति कल्पः तत्रैव।

२२. श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्। याज्ञ.स्मृतिः आचाराध्यायः, श्लोकसं.७

२३. द्र.वाक्सूक्तम्-ऋग्वेदः १०-१२५

२४. प्रत्यक्षं देवतानां यस्मिन्मन्त्रेऽभिधीयते। तामेव देवतां विद्यान् मन्त्रे लक्षणसम्पदा ।।
बृहद्देवता १.११
सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते। दृश्यन्ते देवता यस्मिन् एकस्मिन् बहुषु द्वयोः ।।
बृह.१.१३

२५. देवतार्षाथ छ[illegible]स्तो वैविध्यं च प्रजायते १,१४
तथा च समानच्छन्दसो याः स्युस्तच्छन्दःसूक्तमुच्यते।
वैविध्यमेव सूक्तानाम् इह विद्याद् यथायथम्॥ बृह.१,१६

२६. Behind every book is a man; behind the man is the race; and behind the race are

the natural and social environments whose influence is unconsciously reflected- see- English literature-page-2, by William J. Long, A.I.T.B.S.Publishers.

२७. द्र.महीधरभाष्यम्-शक्लयजुर्वेदस्य प्रथमाध्याये प्रथमो मन्त्रः ।

२८. वैदिकस्वरमीमांसा-पं. युधिष्ठिरमीमांसक-पृ.६५

वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते । - स्वा. दयानन्दसरस्वती ।

अन्धकारे दीपिकाभिर्गच्छन्स्खलति कचित् ।

एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति ॥ द्र-वैदिकस्वर मीमांसा-पृ.१

***

Scanned with CamScanner